# वैयाकरणसिद्धान्तकौमुदी

## हलन्तनपुंसकलिङ्गप्रकरणम् (०३)

## ०३.०९.२०१२

# नकारान्ताः नपुंसकलिङ्गाः

- नकारान्तः नपुंसकलिङ्गः 'अहन्' शब्दः

- अहन् स्
- अहन् ('स्वमोर्नपुंसकात्' - ७.१.२३)

- अहन् + भाति
- अहर्भाति ('रोऽसुपि' - ८.२.६९ - अह्नः रेफादेशः स्यान्न तु सुपि)

- ‘विभाषा ङिश्योः’ (६.४.१३६)
- अह्नी/ अहनी

- अहानि

- अहन् भ्याम्

# अहन् (८.२.६८)

- एकपदात्मकं सूत्रम् ।
- ‘ससजुषो रुः’ (८.२.६६) इत्यतः ‘रुः’ इति अनुवर्तते ।
- ‘अहन्’ इत्यस्य रुः स्यात् पदान्ते ।
- अहन् भ्याम्
- अहर् भ्याम्   (‘अहन्’ - ८.२.६८)
- अह उ भ्याम्(‘हशि च’ - ६.१.११४)
- अहोभ्याम्   (‘आद्गुणः’ - ६.१.८७)

- अहोभिः ।

- इह ‘अहः’, ‘अहोभ्याम्’ इत्यादौ रत्वरुत्वयोः असिद्धत्वात् नलोपे प्राप्ते ‘अहन्’ इति आवर्त्य एकेन नलोपाभावं निपात्य द्वितीयेन रुः विधेयः ।
- ‘नलोपः प्रातिपदिकान्तस्य’ (८.२.७)
- ‘अहन्’ (८.२.६८)
- ‘रोऽसुपि’ (८.२.६९)

- तदन्तस्यापि रत्वरुत्वे, दीर्घाणि अहानि यस्मिन् सः दीर्घाहा निदाघः ।
- इह हल्ङ्यादिलोपे प्रत्ययलक्षणेन ‘असुपि’ इति निषेधाद् रत्वाभावे रुः, तस्य असिद्धत्वात् नान्तलक्षणः उपधादीर्घः ।

- दीर्घाहन् स्
- दीर्घाहन् ('हल्ङ्याब्भ्यो..' - ६.१.६८)
- दीर्घाहर् ('अहन्' - ८.२.६८)
- दीर्घाहार् ('सर्वनामस्थाने चासम्बुद्धौ' - ६.१.४)
- दीर्घाहाः ('खरवसानयोः..' - ८.३.१५)

- दीर्घाहार् निदाघः
- दीर्घाहाय् निदाघः ('भोभगोअघो..' - ८.३.१७)
- दीर्घाहा निदाघः ('हलि सर्वेषाम्' - ८.३.२२)

- सम्बुद्धौ तु हे दीर्घाहो निदाघ ।
- हे दीर्घाहन् स्
- हे दीर्घाहन् (‘हल्ङ्याब्भ्यो..’ - ६.१.६८)
  - ‘असम्बुद्धौ’ इति निषेधात् न उपधादीर्घः
- हे दीर्घाहर् (‘अहन्’ - ८.२.६८)
- हे दीर्घाहः (‘खरवसानयोः..’ - ८.३.१५)

- हे दीर्घाहर् निदाघ
- हे दीर्घाह उ निदाघ (‘हशि च’ - ६.१.११४)
- हे दीर्घाहो निदाघ (‘आद्गुणः’ - ६.१.८७)

- दीर्घाहानौ, दीर्घाहानः ।
- दीर्घाह्ना, दीर्घाहोभ्याम् ।

- नकारान्तः नपुंसकलिङ्गः दण्डिन् शब्दः ।
- ‘अत इनिठनौ’ (५.२.११५) इति इनिप्रत्ययान्तः ।
- दण्डि
  - सोः लुक्, नलोपः
- दण्डिनी
  - औङः शी, असर्वनामस्थानत्वात् न उपधादीर्घः

- दण्डीनि
  - जसः शिः, ‘इन्हन्पूषार्यम्णां शौ’ (६.४.१२) इति उपधादीर्घः ।
- दण्डिना, दण्डिभ्याम् इत्यादि ।

- नकारान्तः नपुंसकलिङ्गः ‘स्रग्विन्’ शब्दः ।
- ‘अस्मायामेधास्रजो विनिः’ (५.२.१२१) इति विनिप्रत्ययः ।
- इह इनः अनर्थकत्वेऽपि ‘इन्हन्..’ इत्यत्र ग्रहणं भवत्येव, ‘अनिनस्मन्..; इति वचनाद् इति बोद्धव्यम् ।
- ‘अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्’ (प)
- ‘अनिनस्मन्ग्रहणानि अर्थवता चानर्थकेन च तदन्तविधिं बोधयन्ति’ (प)

- स्रग्वि, स्रग्विणी, स्रग्वीणि ।
- दण्डिवद्रूपाणि ।

- नकारान्तः नपुंसकलिङ्गः 'वाग्ग्मिन्' शब्दः ।
- 'वाचो ग्मिनिः' (५.२.१२४) इति ग्मिनिप्रत्ययान्तः ।
- वाग्ग्मि, वाग्ग्मिनी, वाग्ग्मीनि ।
- दण्डिवद्रूपाणि ।